International Journal of Sanskrit Research 2021; 7(6): 01-04

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(6): 01-04
© 2021 IJSR
www.anantaajournal.com
Received: 01-09-2021
Accepted: 03-10-2021

**Saroj Mahananda**
Research Scholar, P.G. Department of Sanskrit, Utkal University, Bhubaneswar, Odisha, India

Laxman Majhi
Research Scholar, P.G. Department of Sanskrit, Utkal University, Bhubaneswar, Odisha, India

**Corresponding Author:**
**Saroj Mahananda**
Research Scholar, P.G. Department of Sanskrit, Utkal University, Bhubaneswar, Odisha, India

# वृक्षायुर्वेदानुसारं तरुरक्षणोपायाः

**Saroj Mahananda and Laxman Majhi**

**शोधसंक्षिप्तिका**

सृष्टिरियं कर्मफलाधीना। जीवितानां प्राणीनां पोषणाय संवर्धनाय च अहर्निशम् आहार: आवश्यक: । आहार: च अत्र मत: अन्नमेव जीवनस्य मूलं तच्च कृषिसाध्यम्। कृषिकर्मविषये यथा – कृषे: स्वरूपं, कर्षणं, वपनं, सेचनं, कृषिरक्षणं, भूमिच्छिद्रपिधानं, कृषिप्रवन्धनं सन्दर्भेषु संस्कृतवाङ्मये वहुषु शास्त्रेषु वर्णनं दृश्यन्ते। वृक्षायुर्वेदानुसारं कथं कृषे: रक्षणं करिष्यति एतस्य अध्ययनपरक: प्रयत्न: शोधपत्रेऽस्मिन् अभिप्रेत:।

**कुटशब्दा:** कृषक:, वृक्षायुर्वेद, भूमि:, वातपित्तकफ, वृक्ष:

## प्रस्तुताध्ययनस्य परिसर: प्रासङ्गिकता

कृषे: रक्षणं सर्वदा अनिवार्यं भवति। प्राचीनकाले वृत्त्यर्थं कृषि: मूलं जीविका आसीत् । जना: प्राचीन कृषिपद्धत्यनुसारं कृषिकार्यं कृतवन्त:। अनेन परिवेश: तथा पर्यावरणं शस्यश्यामला एवं सुरक्षितं च आसीत्। परन्तु अधुना एकविंशति: शतके आधुनिककृषिविज्ञाने जनानाइ आवश्यकतानुसारं कृषिद्रव्याणां वहुलं उत्पादनार्थं आधुनिकयन्त्रांशा: रासायनिकपदार्थानां प्रयोगेण परिवेश: तथा मृत्तिका दूषिता: भवति। अस्मात् कारणात् पर्यावरणे वहु: विश्रृङ्खला दृश्यते। अत: कृषे: रक्षणं तथा पर्यावरणस्यापि सुरक्षा साम्प्रतिके युगेऽस्मिन् अनिवार्या भवति। वृक्षायुर्वेदं विहाय कृषिरक्षणं उपरि गवेषणात्मकमध्ययनं नैव शक्यते।

## उपक्रम:

कृषिर्गावोवणिग्विद्या: स्त्रियो राजकुलानि च ।
क्षणेनैकेनसीदन्तिमुहुर्तमनवेक्षणात् ।।[1]

कृषक: काले-कालेकृषिं सम्यगवेक्ष्य तस्यारोगाय कृतप्रयत्न: स्यात्। अन्नस्य गुणपरिमाणौहितदाश्रितौभवत: । उत्तमक्षेत्रमुत्तमंबीजं च यथाऽवश्यकं भवति तथैव कृषेरनारोग्यमपि अपेक्ष्यते। रोगा: कृषिशरीरस्य शत्रवोभवन्ति। ये नकेवलं शस्यहानीं कुर्वन्ति, अपि तु दूषितमन्नं भुक्त्वामनुष्यपश्वादय: प्राणिनोऽपिअपुष्टशरीरा: दुर्बलाश्च जायन्ते । अत: कृषक: वृक्षायुर्वेदस्य ज्ञाताभवेत्तत्कृते च सर्वप्रकोराणांरोगाणां कारणानितदुपचारज्ञानं चावश्यकमस्ति कृषिरोगा: सामान्यत: द्विधा भवितुमर्हन्ति–अन्त:रोगा:, बाह्यरोगाश्च प्रकृतिजन्या: भवन्ति, ये शीतोष्णोवर्षादिभ्यो जायन्ते। शस्यशरीरस्य उपादानंभूमि: भवति। अत: भुमे: विकारादपिरोगा: भवितुमर्हन्ति। अत्र संक्षेपेणकृषिरक्षाया आयुर्वेदीयपक्षमधिकृत्य चर्चा क्रियते। प्रथमं तावत् रोगाणां वर्गीकरणं कृत्वा तत् कारणानि निर्दिश्यन्ते।

आयुर्वेदे शरीरवृद्धिकरेषुभावेषु कालयोगा: स्वभावसंसिद्धि: आहारसौष्ठमविघातश्चेति चत्वारोभावाउक्ता: । तत्राविघात: शरीरघातकतत्त्वानामभावरूपोभवति। विघाताएवरोगा: भवन्ति। वृक्षायुर्वेदानुसारं मूलत: सर्वेऽपिरोगा: वातपित्तकफजन्या: भवन्ति। वातपित्तकफ एव आहारादिनाशरीरेण गृह्यमाण: तदङ्गतया शरीरस्य स्वरूपं निर्धारयति। ऋतुजन्यशीतातपवर्षा च शरीरस्य प्रकृतिम् आहारं च प्रभावितं करोति। एवं वीजप्रकृति: शरीरघटकं, ऋतुश्च समयोगेन परस्परमनुकूला: अनरोग्यस्य हेतुर्भवति, प्रतिकूलाश्च रोगस्य कारणं भवति। प्रकृतिस्तत्र आनुवंशिकी भवति। शरीरमाहारपरिणामेण सिद्धयते। ऋतुश्च कालपरिणामेन जायते। त्रयाणामपि सङ्घटनात्मकं स्वरूपम् अवबोद्धुं वातपित्तकफानां स्वरूपज्ञानमावश्यकं भवति। आयुर्वेदविशारदा: तत्स्वरूपमेवं प्रवदन्ति–

रुक्षशीतश्चलो वायु: पित्तमुष्णं कटुत्रयम् ।
स्थिराम्लस्निग्धमधुरंबालासंप्रचक्षते ।।[२]

अर्थात् वात: रुक्ष: शीत: चलश्च भवति। पित्तम् उष्णं त्रिकटु भवति कफश्च स्थिरोऽम्लमधुर: स्निग्धश्च भवति । एतेषां वृद्धिक्षयोयोरयं नियमो भवति, यत् समानगुणेनाहारेण वातादीनां वृद्धि: भवति। विपरीतगुणाहारेण च क्षयो भवति । एवं मधुराम्ललवणरस: श्लेषाष्मावर्धक: वातनाशकश्च भवति। कटुतिक्तकषायरसो वातवर्धन: कफनाशकश्च भवति। कट्वम्ललवणरस: पित्तवर्धक: तिक्तमधुरकषायश्च पित्तनाशको भवति। रसविपाकानामयं गुण: । अत च ऋत्वनुसारेण वातादीनां परिणाम: ज्ञेय: अग्निपुराणानुसारेण शिशिरेन्तेग्रष्मी च क्रमश: कफस्य चय: प्रकोप प्रशमश्च भवति । यथोक्तम्–

शिशिरे च वसन्ते च निदाघे च यथा क्रमात् ।
चयप्रकोप्रशमा: कफस्य तु प्रकीर्तिता: ।।
निदाघवर्षारात्रौ च तथाशरदिसुश्रुत।
चयप्रकोपप्रशमा: पवनस्य प्रकीर्तिता: ।।
मेघकाले च शरदिहेमन्ते च तथा क्रमात् ।
चयप्रकोपप्रशमास्तथा पित्तस्य प्रकीर्तिता: ।।[३]

एवमेव भूमीनां वातादि प्रधानत्वं निर्वर्ण्य अग्निपुराणकार: कथयन्ति, यद् अनूपभूमि: वातश्लेष्मकारी भवति, वनभूमिश्च पित्तबहुला भवति । साधारणभूमौ च त्रयाणां समयोगो भवति । उक्त प्रकारेण कृष्यार्हत्वस्य दृशा अनुपभूमौ वर्षाशरदृत्वोश्च कफप्रधानप्रकृतीनां किञ्चिदुष्णप्रधानयवचणकाढक्यादीनां साधारणभूमौ वसन्तग्रीष्मर्त्वो: किञ्चिदुष्णप्रधानयवचणकाढक्यादीनां वृद्धि: भवति। प्रकृति: भूमि: ऋतु: इति घटकत्रये प्रातिकूल्येन कृषिशरीरे वातादिजन्या: रोगा: जायन्ते । एते रोगा: पादपेषु दौर्बल्यं स्तम्बपत्रयो: ग्रान्थिं, फले कठोरतामल्परसत्वममाधुर्यं च जनयन्ति।[४] वराहमिहिर: शीतवातातपै: रोगै: पाण्डुपत्रादि रोगाणामुत्पतिं स्वीकरोति–

शीतवातातपै: रोगो जायते पाण्डुत्रता।
अवृद्धिश्च प्रवालानांशाखाशोषोरसस्तुति: ।[५]

वृक्षायुर्वेदे विविधर्तुषु भवानां वातपित्तकफजन्यानां रोगाणां स्वरूपं लक्षणं चोक्त्वातत्तद्रोगाणामुपचारोविहित:।

**कफजन्यरोगा:**

कफजन्यरोगा: वसन्तर्तौशीतर्तौ च जायन्ते । अधिकसेचनेन, मधुरस्निग्धवाम्लद्रव्यै: सीतलद्रव्यै: सेचनेनवाकफरोगा: भवन्ति। एतै: रोगै: फलप्रसूतौ विलम्बोभवति। फलानि पीतानि च भवन्ति, पत्राणि शुष्काणि भवन्ति फलानि अपक्वानि स्वादरहितानि च भवन्ति ।[६]

**पित्तजन्यरोगा:**

ग्रीष्मान्ते चेद्मेघा: न दृश्यन्ते । कट्वम्ललवणकठोरद्रव्यैर्वा सेचनं क्रियते चेत्तर्हि पित्तजन्यरोगा: जायन्ते । एतत्प्रभावात् पत्राणि पीतानि च जायन्ते । फलान्यकाले पतन्ति। पुष्पफलान्यपि पितानि भवन्ति। अतिग्रीष्मप्रभावान्मूलभागंकीटा: नाशयन्ति। फलत: पत्रेषु शुष्कतापाण्डुता च जायते।[७]

**वातजन्यरोगा:**

वातजञ्जादि वृक्षान्समूलं शिशिलीकृत्योत्पाटयति। एषा स्थिति: द्विधा भवति । प्रथमावस्थायां शाखा: वृक्षेषु तिष्ठन्ति द्वितीयावस्थायां च ता: पतन्ति ।[८]

**वातादीनामसन्तुलजन्यरोगा:**

पादपप्रकृतौ भूमौ वा अग्न्याधिक्येन मृच्छोषेण निर्जलत्वेन वा वृक्षा: शुष्का: भवन्ति। कफवैषम्यवशाद् व्रणंविनैव वृक्षा: शुष्यन्ति। अनभीष्टोपचाराद् वातदोषा: जायन्ते । वातवैशम्यवशाद् वृक्षा: पत्राणि पुष्पाणि फलानि च मुञ्चन्ति। जलदोषेण अग्निदोषेण अनुपयुक्तमृद: ऋतोश्च प्रभादपि एते रोगा: भवन्ति।[९]

**त्रिदोषजन्यरोगाणां कारणम्**

त्रिदोषवैषम्य कारणं दुष्टबीजम् उपचाराभाव: दोषपूर्णोपचारो वा भवति। एतस्माद् वृक्षाणां प्रजननक्षमताऽपि प्रभाविता भवति।[१०]

**अन्ये रोगा: तत्कारणं च**

त्रिदोषाणां वैषम्यवशात् वृक्षपादपेषु पाण्डुरोगो जायते। फलत: वृक्षाणां स्कन्धपत्रफलेषु पीतिमा जायते। पिपीलिकानामक्रमणात् जलातिरेकाच्च वृक्षेषु विरसत्वं स्वभाविकगन्धाभाव: पत्ररक्षणं च भवति । एवमेव अन्यवृक्षै: सह संयोजनं निरन्तरमग्नौवाते छायायां व स्थिति: पक्षिणामतिशयेन अवस्थानं लतानामतिशयेनाश्रयत्वं वन्यतृणादीनां प्ररोहश्च वृक्षाणां विनाशं करोति।[११] वराहमिहिरोऽपि अत्यधिकछायायां शाखाविटपपत्राणां स्थितिं पर्णफलानां रुक्षत्वस्य पाण्डुरत्वस्य च कारणं मन्यते। काश्यपस्य मतं च प्रस्तौति-

शाखाविटपपत्रैश्च छायाया विहिताश्च ये ।
येऽपि पर्णफलैर्हीना रुक्षा पत्रैश्च पाण्डुरै: ।।[१२]

मूलेशीतोष्णवर्षावातादीनां व्यामिश्रणं गजानांकण्डुयनकर्षणादिकं च वृक्षरोगस्य कारणानि भवन्ति इति काश्यप: । वराहमिहिर: उदाहरति-

शीतोष्णवर्षवाताद्यैर्मूलव्यामिश्रितैरपि ।
शाखिनां तु भवेद्रोगोद्विपानांलेखनेन च ।।[१३]

**वृक्षरोगाणांचिकित्सा**

सर्वप्रकारकाणां वृक्षरोगाणां चिकित्सार्थं प्रथमं तेषां प्रक्षालनं कर्तव्यम्। तत्र शीतवातातपजन्यशाखाशोषेरसस्तुतौ वा प्रथमं प्रभावितभागं शस्त्रेण विशोध्य तत: विडङ्गघृतपङ्कै: विलेपनं कृत्वा क्षीरमिश्रितेन जलेन सेचनं कर्तव्यम् ।

चिकित्सितमथैतेषांशास्त्रेणादौविशोधनम् ।
विडङ्गघृतपङ्काक्तान् सेचयेत् क्षीरवारिणा ।।[१४]

**उक्त चिकित्सया क्षतानां वृक्षाणां पुनर्नवीकरणं जायते इति कश्यप:**

चिकित्सितेषु कर्तव्या: ये च भूय: पुनर्नवा: ।
शोधयेत्प्रथमं शस्त्रै: प्रलेपं दापयेत् तत: ।।
कर्दमेनविडङ्गैश्च घृतमिश्रैश्च लेपयेत् ।
क्षीरतोयेन सेक: स्याद्रोहणं सर्वशाखिनाम् ।।[१५]

वातजन्यरोगाणां चिकित्सार्थं कुणपयोगेन सेचनं[१६] कफजन्यरोस्योपचारार्थं श्रीफलसर्वतोभद्रपाटलगणिकारिकास्योनकश्चेति पञ्चमूलानां योगं जले व्यामिश्र्य सेक: प्रशस्यते ।[१७] सर्वविधानांकफरोगाणां निवारणार्थं श्वेतसर्षपस्य लेपं मूलेकृत्वा भस्मयोगमिश्रितजलेन सेक: कर्तव्य:।[१८]
कफजन्यरोगा: जलाधिक्यवशाच्छीतवशाद्वा जायन्ते, अतस्तेषां निवारणार्थं मूलस्थांमृदमासमन्ताद् अपसार्य शुष्कमृत्क्षेपणं विहितम् ।[१९] पित्तजन्यरोगाणां चिकित्सार्थं शितमधुरद्रव्याणां प्रयोगो विहित: । दुग्धमधुयष्टिमधुमधूकश्चेति एतेषां द्रव्याणां मिश्रणेन सेचनेन पित्तरोगाणां नाश: भवितुमर्हति । सर्वविधानां पित्तरोगाणां

नाशः भवितुमर्हति । सर्वविधानां पित्तरोगाणामुपचारः त्रिफलाघृतमधूनां योगेन कर्तव्यः ।[२०]

**कीटकृतरोगाणामुपचारः**

प्रायः विविधैः कारणैः वृक्षस्य विविधेष्वयवेषु कीटाणवः संक्रमणं कृत्वा तान् सरुजान कुर्वन्ति । तत्र मूले शाखासु च प्राप्तानां कीटानां विनाशाय सप्तदिनानि शीतलेन जलेन सेचनं प्रभावकरं भवति। विषाणुनाशाय दुग्धगोमयकुणपजलानां लेपं जले संयोज्य सेकः कर्तव्यः । श्वेतसर्षपवचकुश्तातितवसानां योगस्य मूलेनिधापनेनापि विषाणवो नश्यन्ति ।

वृक्षाणामुपरितनीयेष्ववयवेषुलग्नाः कीटाः श्वेतसर्षपविडङ्गवचोषनानां धूमेन महिषश्रृङ्गमांसशूकरमांसभिल्लतकचूर्णमिश्रितजलेन प्रक्षालनेन च नश्यन्ति । बहिः स्थिताः कीटाः कीटाणवश्च घृते विडङ्गस्य योगं कृत्वा लवणयुक्त जलेन सप्तदिनानि सेकेन, महिषमांसश्वेतसर्षपशमीलेपनेन च नश्यन्ति।[२१] तैलमिश्रितजलेन उपस्कारेण पत्रेषु प्रसूताः कीटाणवो नस्यन्ति। कीटक्षताः वृक्षाविडङ्गशिंशपागोमूत्रघृतसर्षपाणां योगोपस्कारेण स्वस्थाः भवन्ति।[२२]

दग्धरोगाः -

झुलसा इत्याधुनिकनाम्ना ख्यातः कृषिरोगः तापाधिक्येन प्रायः जायते। एतद्रोगपीडितो वृक्षः बहिरावृत्य कुणपजलसेकेन दुग्धोपस्कारेण च स्वस्थो भवति।[२३]

**वृक्षव्रणोपचारः**

वृक्षाणां शाखात्रुटौ प्लक्षो दुम्बरयोः त्वग्घृतमधुमदिरादुग्धानां योगेन सम्मिश्री कृत्य क्षतेऽवयवे विलेप्य शालिशाखया रज्जुना बध्नीयात् । ततः वृक्षस्यालवाले नवीनमृदं पूरयित्वा महिषीदुग्धेन प्रक्षणंकुर्यात् । अनन्तरमालवाले जलं पूरयेत् । अनेनोपचारेण त्रुटिताः शाखाः पुनर्नवाः भवन्ति।

शाखाक्षतौमधुघृतमिश्रणेन लेपंकृत्वादुग्धमिश्रितजलेन प्रोक्षणं विधाय सेकः क्रियते चेत्तर्हि शाखाः पुनः प्ररूढाः आकाशगामिन्यो भवन्ति ।[२४]

**दग्धशाखाचिकित्सा**

शाखायां दग्धायां सतिप्रभावितभागं छित्वादुग्धमिश्रितजलेन प्रोक्षणेन कर्कटादित्वचाधूमदापनेन च शाखास्वस्था भवति । दग्धे वृक्षे कमलपङ्कं विलेप्य कुणपयोगेन सेको विधीयताम् तदाशाखाः आकाशगामिन्यो भवन्ति। तडित्पातेन वृक्षदाहेसतिविदारिशर्करानागजिह्वाशिंशपाचेतिसर्वेषां योगं दुग्धजलेन मिश्रणीकृत्य तत्प्रोक्षणेन वृक्षः चतुःशस्यकालान् फलानि यच्छति। जलाल्पतया वृक्षाशोषेसतिदुग्धजलेन सेकं कृत्वा कर्कटत्वचः धूमदापनेन उपचारो भवति।

**मृद्दोषकृतरोगोपचारः**

मृद्दोषवशात् शुष्कवृक्षस्य मूलभागाद् मृदं बहिः निःसार्यनवीनां शुष्कां मृदं निधापयेत् दुग्धमिश्रितजलेन च प्राक्षणं कुर्यात् ।

**अनुपयुक्तोपचारजन्यनिवारणम्**

अनपेक्षितोपचारवशाद् यदा वृक्षेषुरोगो जायते तर्हिदुग्धजलेन प्रोक्षणं विडङ्गमिश्रितपङ्केन च घनविलेपनेन रोगशान्तिर्भवेत् ।

**पाण्डुरोगचिकित्सा**

वृक्षाणां पाण्डुरोगचिकित्सार्थं यवचूर्णं गोधूमचूर्णं मधु च दुग्धेन भावयित्वा तन्मिश्रितेन जलेन सेकः कर्तव्यः । एवं कतिचित्सप्ताहैः सेकेन नियन्त्रितो भवति ।

**वन्ध्याबीजचिकित्सा**

येषु पादपेषु वन्ध्यत्वरोगवशात् फलपुष्पादयो न जायन्ते, तेषु कुणपयोगेन सेकेन पुष्पफलानि जायन्ते शिंशपायवकुलत्थहरितचणकश्यामचणकानां शीतमिश्रणेन सेकः क्रियते, तर्हि वन्ध्यपादपानां शाखाः पुष्पफलैः समृद्धाः भवन्ति शिंशपा, अजाविकाविण् इति प्रत्येकमाढकपरिमाणं, यवस्य प्रस्थं जलस्य द्रोणं महिषमांसं च सप्तरात्रं स्थापयित्वा, तेन योगेन सेकः क्रियते चेत्तर्हि चतुःशस्यकालपर्यन्तं फलानि पुष्पाणि च प्राप्यन्ते ।

एवं विविधवृक्षरोगाणामुपचार उक्तः । उक्त विधिभिः चिकित्सया चेत् फलंन लभ्यते तर्हि पादपानामन्यत्र रोपणं कुर्यात् ।

**शाकादिपादपचिकित्सा**

प्रसृतनां कीटानां वार्ताकपटोलिकादीनां वल्लीनां कूष्माण्डानां कलाटानां शूरणानां शकुटानां हरिद्राणामाद्रकाणां पत्रेषुकीटादिभिः भक्षणं दृश्यते तेषांकीटानां निवारणाय काश्यपः भस्मधूलीक्षेपणं सुधाजलेन सेचनं च निर्दिशति–

शाकादिपत्रजालेषुवार्ताकानांतथाक्वचित् ।
पटोलिकानांवल्लिनांषवष्कानांतथैव च ।।
कूष्माण्डानांकलाटानांसूरणानांतथैव च ।
शाकुटानांहरिद्रामार्द्रकाणामपिक्वचित् ।।
पत्रजालेषुकीटादिभक्षणं दृश्यते नरैः ।
अतस्तत्कीटदोषादिनिरासार्थं कृषीवलाः ।।
भस्मधूलीक्षेपणंवासुधासलिलसेचनम् ।
कारयेत् क्रमतः कालेदेशाचारवशात्तथा।।[२५]

**उपसंहारः**

एवं भूमिबीजर्तुदोषजन्यरोगाणां चिकित्सया कृषिरक्षां कृत्वा विविधयोगानां सम्प्रयोगेण ऋतुभिन्नकालेष्वपि नानाधान्यौषधीनां शाकफलादीनां कृषिः कर्तुं शक्यते । केचिद् योगाः निम्नोल्लिखिताः सन्ति।

१. नवनीतमिक्षुरसं च माहिषमांसचूर्णेविडङ्गयोगेन भावयित्वा मूले सेचनं क्रियते चेत्तर्हि निश्चितमेव ऋतुभिन्नकाले एकमासपर्यन्तं पुष्पफलानि जायन्ते।
२. वराहीजीरकमिक्षुरसं च मासेन घृतपात्रे स्थापयित्वा चन्द्रमासः रश्मिषु निधापयेत् । यदा मिश्रणं सम्यग् सिद्धयतेतर्हि पादपमूले निधाप्य आर्द्रमृदा पूरयेत् । तत इक्षुरसस्य प्रोक्षणेन मधुकुणपयोः धूमेन भावयित्वा ऋतुभिन्नकालेऽपि पुष्पसमृद्धिः जायते

बीजरहितकूष्माण्डवार्ताकपोटलकादीनां कृष्यर्थमपि विशेषयोगाः उक्ताः । काश्यपः सर्वेष्वपिकृषिकार्येषुदेशाचारं विशेषेणप्रशंसते। विविधेषुप्रदेशेषु विविधवृक्षपादपादीनामोषधीनां च रोगोपचारार्थं सम्प्रति रासायनिकयोगा अपिप्रचलिताः सन्ति, किन्तु परम्परागतयोगानां सम्प्रयोगः भारतीयपरिवेशे हितकरोभवति ।

**टिप्पणी:**

१. कृषिपराशरः,८१.
२. अग्निपुराणम् वृक्षायुर्वेदध्यायः,२८०.१७
३. अग्निपुराणम् वृक्षायुर्वेदध्यायः,२८०.२२-२४.
४. वृक्षायुर्वेदः, १६८.
५. वृहत्संहिता वृक्षायुर्वेीध्यायः,१४.
६. वृक्षायुर्वेदः,१६९-१७०
७. वृक्षायुर्वेदः,१७१-१७३.
८. वृक्षायुर्वेदः,१७४.
९. वृक्षायुर्वेदः,१७५-१७८.
१०. वृक्षायुर्वेदः,१८०.
११. वृक्षायुर्वेदः,१८१-१८२.

१२. वृहत्संहिता वृक्षायुर्वेध्यायः,१.
१३. वृहत्संहिता वृक्षायुर्वेध्यायः,२
१४. वृहत्संहिता वृक्षायुर्वेध्यायः,१५.
१५. वृहत्संहिता काश्यपमतम्
१६. वृक्षायुर्वेदः,१८५.
१७. वृक्षायुर्वेदः,१८७.
१८. वृक्षायुर्वेदः,१८८.
१९. वृक्षायुर्वेदः,१८९.
२०. वृक्षायुर्वेदः,१९०-१९२.
२१. वृक्षायुर्वेदः,१९३-१९६.
२२. वृक्षायुर्वेदः,१९७-१९८.
२३. वृक्षायुर्वेदः,१९९
२४. वृक्षायुर्वेदः,२००-२०३.
२५. काश्यपीयकृषिसूक्तिः शाकादिकृषिक्रमकथनम् ४६-५०.

**सन्दर्भग्रन्थसूची**


१. संस्कृतवाङ्मये कृषिविज्ञानम् , डा. नवलता, नागपब्लिशर्स, दिल्ली,११०००७
२. कृषिपराशरः , अनुवादकः सम्पादकश्च श्री द्वारिका प्रसादशास्त्री , चौखम्बा संस्कृत सीरीज,
३. काश्यपीयकृषिसूक्ति , प्रकाशकः एशियान एग्रीहिस्ट्री फाउण्डेसन् , सिकन्दरवाद्
४. बृहत्संहिता, पण्डित अच्युतानन्द झा , चैखम्बाविद्याभवन, वारणासी, २०११